

संस्कृतभरती, तेलङ्गाणा

# बालकेन्द्रम्

**मम देशो भारतम्**
**मम भाषा संस्कृतम्**
**वदतु संस्कृतम्**
**जयतु भारतम्**



**Visit our website :**
**https://samskritabharati.in**

# प्रारम्भ सम्भाषणम्

हरि: ॐ नमस्कार:

बालकेन्द्र साप्ताहिक कार्यक्रमे बालानाम् स्वागतम्

सर्वे कुशलिनः सन्ति खलु?
गत सोमवासरे श्रावण पूर्णिमायाः पर्व सम्यक् जातं खलु?

इदानीं रक्षासूत्रं सर्वेषां हस्ते अस्ति किल?

# ध्यानम्

प्रथमं वयं सर्वे सम्यक् उपविशामः

मेरुदण्डं  साक्षात् स्थापयामः, करतलं योजयामः

नेत्रे निमीलयामः, कृपया इतस्ततः मा पश्यन्तु

इदानीम् **‘ॐ कार:’**
(त्रि वारम्/ 3 times वदामः)



# प्रार्थना श्लोक: 1

***वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ।***

***निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥***



# प्रार्थना श्लोक: 2

*या कुन्देन्दु तुषारहार धवला या शुभ्रवस्त्रावृता।*

*या वीणावरदण्ड मण्डितकरा या श्वेतपद्मासना ॥*

*या ब्रह्माच्युत शङ्कर प्रभृतिभिर्देवैः सदा वन्दिता।*

*सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥*



# प्रार्थना श्लोक: 3

करारविन्देन पदारविन्दं

मुखारविन्दे विनिवेशयन्तम् ।

वटस्य पत्रस्य पुटे शयानं

बालं मुकुन्दं मनसा स्मरामि ॥ १॥




मम नाम राजेशः ।
भवतः नाम किम् ?
मम नाम सुरेशः ।


मम नाम राधा ।
भवतः नाम किम् ?
मम नाम सुनीलः ।


मम नाम सुनीलः ।
भवत्याः नाम किम् ?
मम नाम पूजा ।

# सम्भाषणम्



एषः पितामहः



सः मातामहः









एष:  पितृव्य:


सः  मातुल:



एषः अनुजः लक्ष्मणः



सः अग्रजः रामः



एषः वानरः



सः भल्लूकः

# एष: सः अभ्यासम्

अहं एकं पदं वदामि, भवन्तः ‘एष:, स:’ योजयित्वा वदन्तु

एष: →

कृष्ण :
देवः
अर्जुन:
छात्र:
देशभक्तः
चालक: (Driver)
चोर: (Thief)
आसन्द: (Chair)
करदीप: (Torch Light)

सः →

इन्द्र:
भीम:
सैनिक:
उपाध्याय:
युवक:
कर्मकर: (Servant)
आरक्षकः (Police)
गोलदीप: (Bulb)
दण्डदीप: (Tubelight)

# अभिनय गीतम्

जन्मदिनमिदम् अयि प्रिय सखे
शंतनोतु ते सर्वदामुदम् ।

प्रार्थयामहे भव शतायुषी
ईश्वर: सदा त्वां च रक्षतु ।

पुण्य कर्मणा कीर्तिमर्जय
जीवनं तव भवतु सार्थकम्



# सङ्ख्याः - पुनः स्मरणम्

एकम् -1

द्वे -2

त्रीणि -3

चत्वारि -4

पञ्च - 5

षट् -6

सप्त - 7

अष्ट - 8

नव - 9

दश - 10

एकादश - 11

द्वादश - 12

त्रयोदश - 13

चतुर्दश - 14

पञ्चदश - 15

षोडश - 16

सप्तदश - 17

अष्टादश - 18

नवदश - 19

विंशतिः - 20

# सङ्ख्याः-

एकविंशति:(Ekavimshatihi) – 21

द्वाविंशति: (Dvaavimshatihi) - 22

त्रयोविंशति: (Trayovimshatihi) - 23

चतुर्विंशति: (Chaturvimshatihi) - 24

पञ्चविंशति: (Panchavimshatihi) - 25

षड्विंशति: (Shatvimshatihi) - 26

सप्तविंशति: (Saptavimshatihi) - 27

अष्टाविंशति: (Ashtaavimshatihi) - 28

नवविंशति: (Navavimshatihi) - 29

त्रिंशत् (Trimshat) - 30

# क्रीडा - एवं क्रीडामः वा? (5 mts)

आकाशः





भूमिः





पातालः





# नित्य पञ्चाङ्गम्




अद्य

स्वस्ति श्री शार्वरी नाम संवत्सरे, दक्षिणायने,

श्रावण मासे बहुल पक्षे षष्ठी तिथि: शनिवासरः

# शिष्टाचारः

कृपया पश्यतु



कृपया आगच्छतु




कृपया श्रुणोतु



कृपया उपविशतु



कृपया वदतु



# शान्तिमन्त्रः

इदानीम्, शान्ति मन्त्रं  वदामः
सम्यक् उपविशामः, नेत्रे निमीलयामः, मौनेन भवामः

ॐ सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।
ॐ शान्तिः शान्तिः शान्तिः ॥

धन्यवादः, आगामि सप्ताहे पुनः मिलामः

श्री कृष्ण जन्माष्टमि शुभाशयाः